International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(6): 79-82
© 2026 IJMH
www.themultijournal.com

Received: 22-10-2026
Accepted: 10-11-2026
Publish : 12-11-2026

**Dr. Ashutosh Dora**
National Sanskrit University, Tirupati

**Correspondence:**
**Dr. Ashutosh Dora**
National Sanskrit University, Tirupati

# अभिज्ञानशाकुन्तले मानवीयसंवेदना

**Dr. Ashutosh Dora**

**कूटशब्दाः-**मानवीय संवेदना, शकुन्तला, दाम्पत्यम्, मैत्री, नारीगरिमा, अतिथिसत्कारः

**सारांशः-** महाकविकालिदासविरचिते 'अभिज्ञानशाकुन्तलम्' नाटके मानवीयसंवेदनायाः विविधाः पक्षाः सुन्दररीत्या चित्रिताः सन्ति। अस्मिन् नाटके प्रेम, करुणा, वात्सल्यं, त्यागः, विरहः, सहानुभूतिः च प्रमुखतया अभिव्यक्ताः सन्ति। दुष्यन्त-शकुन्तलयोः प्रेमकथामाध्यमेन मानवीयसम्बन्धानां सूक्ष्मभावनानां च मार्मिकं चित्रणं कृतम्। प्रकृतिः, नारीसम्मानः, पारिवारिकमूल्यानि तथा सामाजिकचेतना अपि मानवीयसंवेदनायाः महत्त्वपूर्णानि अङ्गानि सन्ति। वस्तुतः इदं नाटकं मानवजीवनस्य भावात्मकपक्षस्य तथा उदात्तमानवीयमूल्यानां उत्कृष्टं प्रतिबिम्बम् अस्ति।

## प्रस्तावना

महाकविकालिदासस्य 'अभिज्ञानशाकुन्तलम्' इति नाटकं तं कविकुलगुरुपदे प्रतिष्ठापयति। अस्मिन् विषये अतिशयोक्तिर्नास्ति। जर्मनकविना गेटे इत्यनेन अस्य नाटकस्य पठनानन्तरं तस्य महिमा बहुधा प्रशंसित इति प्रसिद्धम्। साहित्यजगति एतत् नाट्यकाव्यं श्रेष्ठं स्थानं प्राप्तवत्। मानवीयमनसः विविधभावतरङ्गैः परिपूर्णमिदं नाटकं मानवहृदयस्य नाटकम् अस्ति। पितृस्नेहः, पशुपक्षिषु स्नेहः, प्रियजनप्रेम, विरहवेदना च अत्र सजीवतया चित्रिताः। प्रकृतिसौन्दर्यस्य वर्णनं, स्मरणीयक्षणानां चित्रणं, मानवीयभावानां सूक्ष्मता, कविकल्पनायाः वैभवं च अस्य काव्यस्य अद्भुतं वैशिष्ट्यम् अस्ति।

**'काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला।**
**तत्रापि च चतुर्थोऽङ्कस्तत्र श्लोकचतुष्टयम्॥'**

'शाकुन्तलम्' इति नाटकं विश्वसाहित्यस्य श्रेष्ठकृतिषु गण्यम्। कविना वनस्पतीनां, पशूनां, मानवजीवनस्य तथा प्रकृतेः भावानां कलात्मकं वर्णनं कृतम्। तस्य सौन्दर्यचित्रणं, विश्वदृष्टिः, शब्दवैभवं कल्पनावैभवं च पाठकस्य हृदये प्रसन्नतां जनयति।

## मूलकथास्रोतः

महाकविकालिदासस्य विश्वप्रसिद्धरूपकस्य 'अभिज्ञानशाकुन्तलम्' इत्यस्य कथावस्तुनो महाभारतस्य आदिपर्वणि स्थिते 'शकुन्तलोपाख्याने' (अध्यायाः ६२–६९) दृश्यते।

महाभारते वर्णितः दुष्यन्तः कामासक्तः, विलासी च राजा आसीत्। सः सरलहृदयां ऋषिकन्याम् शकुन्तलां स्वकामनापूर्तये प्रलोभ्य, कण्वऋषेः आगमनात् पूर्वं तपोवनात् निर्गच्छति। अनन्तरं राजधानीं प्रत्यागत्य शकुन्तलां विस्मरति। पश्चात् शकुन्तला षड्वर्षीयं पुत्रं सर्वदमनं नीत्वा दुष्यन्तस्य सभाम् आगच्छति; किन्तु राजा ताम् अङ्गीकर्तुं न इच्छति। अपमानितापि सा स्वसम्मानं रक्षति। अन्ते आकाशवाण्याः आदेशेन दुष्यन्तः शकुन्तलां पुत्रं च स्वीकरोति। महाभारते दुष्यन्तस्य एतादृशं चरित्रं निन्दनीयम्; अतः सः सहानुभूतेः प्रशंसायाश्च पात्रं न भवति।

कालिदासः तु जीवनस्य परमसत्यं शिवं सुन्दरं च तत्त्वं साक्षात्कृतवान्। जीवनस्य विरोधाभासानां समन्वयेन सः पूर्णतायाः दर्शनं करोति। उमाशङ्करजोशीमतानुसारं कालिदासस्य काव्यरचनायां पूर्णता दृश्यते; तथापि तस्य विशेषः जीवनब्रह्माण्डस्य दर्शनं कर्तुं महती शक्तिः अस्ति। एषा दृष्टिः ऋषेः आध्यात्मिकदृष्टिरिव, ईश्वरीयचेतनया स्पृष्टा च अस्ति।

'अभिज्ञानशाकुन्तले' रागस्य त्यागस्य च महत्त्वं प्रतिपादितम्। अन्ते एतयोः समन्वय एव परमं तत्त्वम्, परम आनन्दस्वरूपं च भवति। हेनरी वेल्सस्य मतानुसारं 'शाकुन्तलम्' केवलं प्रेमकथाधारितं नाटकं न, अपि तु धर्ममूलकं पवित्रं नाटकम् अस्ति।

कविकुलगुरोः कालिदासस्य विश्वविख्यातरूपकस्य 'अभिज्ञान-शाकुन्तलम्' इत्यस्य कथावस्तुनः मूलस्रोतः महाभारतस्य आदिपर्वणि समाविष्टम् 'शकुन्तलोपाख्यानम्' (अध्यायाः ६२ तः ६९ पर्यन्तम्) अस्ति।महाभारते वर्णितः दुष्यन्तः विषयी तथा विलासी स्वभावस्य पुरुषः अस्ति। सः सरलस्वभावाम् ऋषिकन्यां शकुन्तलां स्वकामनापूर्तये स्वजाले पातयित्वा, ऋषेः आगमनात् पूर्वम्, तपोधनस्य कण्वस्य शापभयात् तस्मात् स्थानात् पलायते। ऋषिः तु समीपे एव पुरुषार्थसाधनाय गतः आसीत्।दुष्यन्तः स्वराजधानीं हस्तिनापुरम् आगत्य शकुन्तलां विस्मरति। ततः परं शकुन्तला स्वस्य षड्वर्षीयपुत्रेण सर्वदमननाम्ना बालकेन सह दुष्यन्तस्य सभायाम् उपस्थिताभवत्। किन्तु दुष्यन्तः शकुन्तलां नाङ्गीकृतवान्। अपमानं सोढुम् असमर्था महाभारते वर्णिता शकुन्तला तस्मिन् प्रसङ्गे कटुवचनानाम् आश्रयमपि गृह्णाति।

महाकविकालिदासस्य काव्यप्रतिभायाः सर्वोत्कृष्टं स्वरूपम् 'अभिज्ञानशाकुन्तलम्' इति नाटके सम्यक् सिद्धिं प्राप्तवत्। अस्मिन् नाटके रागस्य त्यागस्य च गौरवं वर्णितम् अस्ति। अन्ते एतयोः द्वयोः ध्रुवयोः समन्वय एव परमं तत्त्वम् इति प्रतिपादितम्। तत् परमं तत्त्वम् आनन्दस्वरूपम् अस्ति।

हेनरी वेल्स् लिखति—

"शाकुन्तलस्य कृतिः प्रेमकथाधारितं नाटकं नास्ति, अपितु धर्ममूलकं पवित्रं नाटकम् अस्ति।"

साहित्यदृष्ट्या 'अभिज्ञानशाकुन्तलम्' एकम् अद्वितीयं कलाकृतिरत्नम् अस्ति। किन्तु तस्य सूक्ष्माध्ययनेन कवेः कान्तदर्शिनः ऋषेः अनुपमदर्शनस्य अनुभूतेः कारणात् आन्तरिकप्रतीतिः जायते। अस्मिन् नाटके मानवीयभावानां दिव्यत्वे रूपान्तरणं कृतम् अस्ति।

कालिदासस्य त्रिषु नाटकेषु नान्दीश्लोके शिवस्य एव स्तुतिः कृता अस्ति। कालिदासः शिवं महान्तं देवं मन्यते। शिवः सत्यं, शिवं, सुन्दरं च इत्यस्य अधिष्ठातृदेवः अस्ति। शिवः एव सृष्टेः समग्रे ब्रह्माण्डे अन्तर्बहिश्च सर्वत्र विद्यमानः अस्ति। तमसः परं परमज्योतिःस्वरूपः शिवः अष्टमूर्तिरूपेण प्रत्यक्षानुभवं दातुं समर्थः परमेश्वरः अस्ति। तस्यैव परमेश्वरस्य महिम्नः अभिव्यक्तिः 'अभिज्ञानशाकुन्तलम्' इति नाटकस्य नान्दीश्लोके दृश्यते।

**क) शिवतत्त्वं प्रकृतिश्च -**

कालिदासस्य नाटकानां नान्दीश्लोकेषु शिवस्य स्तुतिः दृश्यते। कविः शिवं सत्यस्य, कल्याणस्य, सौन्दर्यस्य च आधारभूतं देवतत्त्वं मन्यते। शिवः सम्पूर्णे विश्वब्रह्माण्डे अन्तर्बहिश्च सर्वत्र विद्यमानः। जलम्, अग्निः, सूर्यः, चन्द्रः, आकाशः, पृथिवी, होता तथा वायुः—एताः अष्टौ मूर्तयः शिवस्य प्रत्यक्षरूपाणि इति वर्णिताः। एतेषां तत्त्वानां संयोगेन सृष्टेः आविर्भावः भवति; प्रलयकाले च तानि पुनः परमेश्वरे लीयन्ते।

नाटकस्य आरम्भे दुष्यन्तः मृगस्य वेगेन आकृष्टः भवति। मृगः कामनायाः अथवा रागस्य प्रतीकम् इव दृश्यते। तपोवने वर्धिता, सरलहृदया, सुन्दरी च शकुन्तला अपि दुष्यन्तस्य मनः आकर्षति। दुष्यन्तस्य मनः आरम्भे कामासक्तं, असंयतं च भवति; शनैः शनैः कविः तस्य अन्तःस्थितान् संस्कारान् जागरयित्वा तम् आध्यात्मिकतायाः दिशि नयति। नाटकस्य प्रयोजनं मानवीय-चेतनायाः भौतिकतायाः आध्यात्मिकतां प्रति उन्नयनम् अस्ति।

दुष्यन्तस्य रथमार्गे आगच्छन्तः तपस्विनः विवेकस्य प्रतीकाः भवन्ति। तान् दृष्ट्वा तस्य चेतसि विवेकः जागरति, सः संयमं प्राप्य रथं स्थगयति। तथापि विषयासक्तं मनः सदा विवेकयुक्तं न भवति। ऋषयः तस्मै 'त्वं चक्रवर्तिनं पुत्रं जनयिष्यसि' इति यदाशीर्वादं ददति, तत् तस्य पूर्वसंस्काराणां फलम् इव वर्णितम्। आश्रमं प्रविशन् दुष्यन्तः विनयं न त्यजति। सः सारथिम् उपदिशति—'तपोवनानि नाम विनीतवेषेण प्रवेष्टव्यानि।' अनेन तस्य राजोचितः संयमः विवेकश्च सूचितः।

**ख) शकुन्तलायाः सौन्दर्यं संयमश्च -**

शकुन्तला तपस्विनः विश्वामित्रस्य तथा स्वर्गीयसौन्दर्यवत्याः मेनकायाः कन्या अस्ति। तपसः सौन्दर्यस्य च स्वाभाविकः समन्वयः तस्यां दृश्यते। सा संयतसौन्दर्यस्य मूर्तिरिव अस्ति। तस्याः सौन्दर्यं दुष्यन्तस्य रागवृत्तिम् उद्दीपयति। प्रथमदर्शने एव राजा तया आकृष्टः भवति।

**शुद्धान्तदुर्लभमिदं वपुराश्रमवासिनो यदि जनस्य।**
**दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः॥**[1]

अर्थः—आश्रमवासिनः जनस्य एतादृशं सौन्दर्यं राजभवनेऽपि दुर्लभं स्यात्; गुणैः समृद्धाः वनलताः उद्यानलताभ्यः विशिष्टाः इव दृश्यन्ते।

**सरसिजमनुबिद्धं शैवालेनापि रम्यम्**
**मालिन्यमपि हिमांशोर्लक्ष्मलक्ष्मीं तनोति।**
**'इयमधिकमनोहरा वल्कलेनापि तन्वी**
**किमिव हि मधुराणां मण्डनं नाकृतीनाम्॥**[2]

अर्थात्, कृशाङ्गी शकुन्तला वल्कलवस्त्रेणापि अत्यन्तं मनोहरा दृश्यते। स्वभावतः सुन्दराणां वस्तूनां कृते किमलङ्कारस्य आवश्यकता?

नगरजीवनस्य भौतिकसुखेषु अभ्यस्तः दुष्यन्तः कामनां सहजतया अनुभवति। तपोवनस्य संयमितजीवनं प्राप्तवती शकुन्तला अपि स्वाभाविकान् मानवीयभावान् अनुभवति, तथापि विवेकं धारयितुं समर्था भवति। सा सांसारिकजीवनस्य सर्वान् अनुभवन् न जानाति, तथापि मानवीयभावेभ्यः पूर्णतया पृथक् न भवति। तपोवनस्य पवित्रे वातावरणे ऋषिजनानां संयमस्य प्रभावेण सा इन्द्रियाणां स्वभावं सूक्ष्मतया अवलोकयितुं शिक्षिता।

**ग) प्रेम, विवाहः, कर्तव्यं च -**

शकुन्तलायाः स्वभावे स्वाभिमानस्य तथा कुलप्रतिष्ठायाः भावना महत्त्वपूर्णे स्तः। दुष्यन्तं मिलित्वा सा तस्मिन् अनुरक्ता भवति। यः कण्वऋषिः तस्याः पालनपोषणम् अकरोत्, यः तस्याः हिताय प्रयत्नं कृतवान्, तस्य अनुमतिं विना सा दुष्यन्तेन सह गान्धर्वविवाहं

स्वीकरोति। स्वेच्छया महत्त्वपूर्णं निर्णयं सा शीघ्रमेव करोति; अतः तत्र दूरदर्शितायाः धैर्यस्य च अभावः सूचितः।

दुष्यन्तः बहुपत्नीकः राजा आसीत्; तस्य कालस्य राजपरम्परायां बहुपत्नीत्वं सामान्यं मन्यते स्म। तथापि दुष्यन्त-शकुन्तलयोः प्रेम केवलं स्थूलं भौतिकं वा नास्ति। शकुन्तला स्वस्य सौम्यहृदयेन दुष्यन्तस्य सहचरी भवति। सा कुलप्रतिष्ठां मनसि निधाय स्वसखीं प्रति कथयति यत् बहवीषु पत्नीषु अपि कुलस्य प्रतिष्ठा विशेषेण केनचित् एव रक्ष्यते।

**परिग्रहबहुत्वेऽपि द्वे प्रतिष्ठे कुलस्य मे।**
**समुद्रवसना चोर्वी सखी च युवयोरियम्॥**[3]

अत्र शकुन्तला पृथिवीं समुद्रवेष्टितां तथा सखीम्—एते द्वे कुलप्रतिष्ठायाः प्रतीके इव मन्यते।

दुष्यन्त-शकुन्तलयोः प्रेम गान्धर्वविवाहत्वेन परिणमति। तयोः मध्ये रागसम्बन्धः स्थापितः, किन्तु प्रेम्णः पूर्णा परिभाषा तत्रैव न प्राप्यते। कालिदासस्य दृष्ट्या प्रेम दिव्यं तत्त्वम् अस्ति; तत् मुक्तेः मार्गं प्रकाशयति। यावत् प्रेम केवलं व्यक्तिगतासक्तौ सीमितं भवति, तावत् तस्य पूर्णता न भवति। कविः प्रेम्णि परमात्मतत्त्वस्य आविर्भावं दर्शयितुम् इच्छति।

**घ) दुर्वाससः अभिशापः तथा प्रेम्णः आध्यात्मिकता -**

दुर्वाससः शापः नाटकस्य महत्त्वपूर्णा प्रतिकूलघटना अस्ति। जगति इष्टानिष्टयोः द्वन्द्वं स्वाभाविकम्। इष्टस्य प्राप्तिम् इच्छन् मनुष्यः अनिष्टस्यापि अवगमनं कृत्वा तस्य निवारणाय प्रयत्नं कुर्यात्। शकुन्तला दुष्यन्तं सर्वस्वमिव मन्यमाना कर्तव्येषु प्रमादं करोति; दुष्यन्तश्च तां विस्मरति। तथापि दुष्यन्तस्य प्रेमस्पर्शेण शकुन्तलायाः प्रेम केवलं स्मृतिमात्रे सीमितं न भवति, न च तत् व्यक्तिगतकामनायामेव समाप्तं भवति।

व्यक्तिगतः रागः एव प्रेम इति मन्यमानः दृष्टिकोणः धर्मस्य व्यापकभावनया सह न सङ्गच्छते। दुर्वाससः शापः कथायां सत्यस्य गहनतरसाक्षात्काराय साधनं भवति। इष्टस्य प्राप्तिः केवलं स्वेच्छापूर्तिः नास्ति; अनिष्टस्य अनुभवः अपि मनुष्यम् आत्मबोधस्य दिशि नेतुं शक्नोति। कालिदासस्य काव्यदृष्ट्या प्रेम्णः चरमलक्ष्यं परमं तत्त्वं साक्षात्कर्तुम्, रागं त्यागेन समन्वितुं कर्तुं च अस्ति।

अतः 'अभिज्ञानशाकुन्तलम्' केवलं नायकनायिकयोः प्रेमकथा नास्ति। एतत् मानवीयभावानां परिष्कारस्य, संयमस्य, कर्तव्यबोधस्य, प्रकृतिप्रेम्णः तथा आध्यात्मिकविकासस्य नाटकम् अस्ति। कालिदासः मानवीयप्रेम भौतिकासक्तेः स्तरात् उन्नीय दिव्यतायां प्रतिष्ठापयति। रागस्य त्यागस्य च समन्वयेन एव जीवनस्य पूर्णता तथा परम आनन्दः लभ्यते।

**ङ) वात्सल्यभावः (पितुः स्नेहः)-**

* महर्षिः कण्वः:- यद्यपि कण्वः एकः तपस्वी संन्यासी च अस्ति, तथापि शकुन्तलां प्रति तस्य वात्सल्यभावः अनुपमः अस्ति।

* चतुर्थोऽङ्कः:- चतुर्थाङ्के शकुन्तलायाः पतिगृहगमनसमये कण्वस्य व्याकुलता मानवीयसंवेदनायाः पराकाष्ठा अस्ति।

**यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया**
**कण्ठः स्तम्भितवाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम्।**
**वैक्लव्यं मम तावदीदृशमिदं स्नेहादरण्यौकसः**
**पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः॥**[4]

अर्थात्: अद्य शकुन्तला गमिष्यति इति विचिन्त्य मम हृदयं दुःखेन पूर्णं जातम्, कण्ठः अश्रुभिः रुद्धः अस्ति।मम हृदयं कौतूहलेन विरहदुःखेन च परिपूर्णम् अभवत्। अश्रुप्रवाहस्य अवरोधात् मम कण्ठः गद्गदः जातः तथा चिन्तया मम दृष्टिः स्तब्धा अभवत्।वने निवसन्तः वयं वनवासिनः ऋषयः अपि स्नेहवशात् एतादृशीं व्याकुलताम् अनुभवामः। तर्हि गृहस्थजीवनं यापयन्तः सामान्यजनाः स्वपुत्र्याः नूतनविरहजनितैः दुःखैः कियत् अधिकं व्यथिताः भवन्ति।

**च) दाम्पत्यप्रेम (विरहः च)-**

शकुन्तला-दुष्यन्तयोः प्रेम केवलं शारीरिकाकर्षणं नास्ति, अपितु तस्मिन् गाम्भीर्यम् अस्ति। दुर्वाससः शापकारणात् यदा दुष्यन्तः शकुन्तलां विस्मरति, तदा उभयोः विरहवेदना मानवीयसंवेदनायाः गभीरतां दर्शयति। पश्चात्तापेन दग्धः दुष्यन्तः शकुन्तलायाः स्मृतौ व्याकुलो भवति।

**छ) सखी-स्नेहः (मैत्री)-**

अनसूया-प्रियंवदे शकुन्तलायाः सख्यौ तस्याः सुख-दुःखे स्वकीयम् इव अनुभवतः।सहानुभूतिः यदा महर्षिदुर्वासा शापं ददाति, तदा शकुन्तलां रक्षितुं ते एव महर्षेः क्षमाप्रार्थनां कुरुतः। शकुन्तलायाः पतिगृहगमनकाले तयोः अश्रुपातः निश्छलमैत्र्याः प्रतीकः अस्ति।

**ज) प्रकृत्या सह मानवीयसम्बन्धः-**

**अचेतने चेतनारोपणम् :** कालिदासस्य शकुन्तला प्रकृत्या सह एकात्मताम् अनुभवति। तपोवनस्य पशुपक्षिणः पादपाः च शकुन्तलायाः परिवारावयवाः इव सन्ति। शकुन्तलायाः पतिगृहगमनकाले हरिणः कुशाङ्कुरं त्यजति, मयूराः नृत्यं बन्दं कुर्वन्ति, वृक्षाः च पीतपत्राणां रूपेण अश्रूणि पातयन्तः आसन्।

**मुञ्चन्त्युद्गलितप्रभाणि मृग्यः परित्यक्तनर्तना मयूराः।**
**अपसृतपाण्डुपत्रा मुञ्चन्त्यश्रूणीव लताः॥**[5]

**झ)स्वाभिमानं तथा नारीगरिमा –**

राजसभायां प्रतिवादः: यदा राजा दुष्यन्त शकुन्तलां प्रत्यभिज्ञातुं निराकरोति, तदा शकुन्तला केवलं न रोदिति। सा स्वस्वाभिमानस्य रक्षणाय दुष्यन्तम् 'अनार्यः' (अशिष्टः) इति उक्त्वा भर्त्सयति। इदम् एकस्याः स्वाभिमनिन्याः नार्याः न्यायसङ्गतचेतनां दर्शयति।

अभिज्ञानशाकुन्तलं मानवीयसंवेदनानां महासागरः अस्ति। कालिदासः मानवमनसः सूक्ष्मातिसूक्ष्माः भावनाः कुशलतया चित्रितवान्।

शकुन्तलायाः प्रकृतिसम्बन्धः: शकुन्तलायाः आश्रमस्य वृक्षैः, लताभिः, मृगशावकैः च सह गाढः संवेदनात्मकः सम्बन्धः वर्तते। यदा सा आश्रमं त्यक्त्वा स्वपतिगृहं प्रति गच्छति, तदा सम्पूर्णा प्रकृतिः रोदिति।

**महर्षिकण्वस्य पितृस्नेहः-** यद्यपि कण्वः एकः तपस्वी अस्ति, तथापि पितारूपेण शकुन्तलायाः विदायकाले तस्य अश्रूणि न रुध्यन्ते। इदं दर्शयति यत् संन्यासः अपि सत्याः मानवीयसंवेदनाः न नाशयति।

**दुष्यन्तस्य पश्चातापः-** यदा राजा दुष्यन्त अङ्गुलीयकं दृष्ट्वा सर्वं स्मरति, तदा तस्य करुणविलापः आत्मग्लानिः च तस्य गाढां मानवीयसंवेदनां दर्शयतः।

**ञ)प्रमादः क्षमा च -**

नाटके 'अभिशापस्य' 'विस्मृत्याः' (स्मरणलोपस्य) च माध्यमेन क्षमायाः पृष्ठभूमिः निर्मिता अस्ति।

**दुर्वाससः अभिशापः मानवीयः प्रमादश्च:-** शकुन्तला दुष्यन्तस्य चिन्तायां विचारमग्ना सति अतिथिं दुर्वाससम् ऋषिं नैव सत्कृतवती। अयम् एकः अज्ञातापराधः प्रमादश्चासीत्। दुर्वासा ऋषिःक्रुद्धः अभवत्, अनन्तरं प्रियंवदायाः अनसूयायाः च प्रार्थनया श्रापस्य प्रभावः न्यूनीभूतः, या क्षमायाः प्रथमा सोपानम् अस्ति।

**दुष्यन्तस्य त्यागः-** राजा दुष्यंतः श्रापप्रभावकारणात् शकुंतलां प्रत्यभिज्ञातुम् (ज्ञातुम्) अस्वीकरोति। अत्र शकुंतला महतीं वेदनां प्राप्नोति, परं सा दुष्यंतं न शपति ( कोपं न करोति), अपितु इदं स्वभाग्यस्य दोषं मत्वा मरीचऋषेः आश्रमे तपस्विन्याः जीवनं यापयति। एतत् तस्याः आन्तरिकं क्षमाशीलतां धैर्यं च प्रदर्शयति।

**ट)पुनर्मिलनम् -**

नाटकस्य सप्तमः अङ्कः (अन्तिमः भागः) पुनर्मिलनस्य चरमोत्कर्षः अस्ति, यत्र वासनाविरहितं प्रेम स्वकीयं पवित्रत्वं प्राप्नोति।

**मारीचाश्रमे मिलनम् -** शकुन्तलादुष्यन्तयोः पुनर्मिलनं राजभवने न, अपितु स्वर्गसदृशे पवित्रे 'मारीचऋषेः' आश्रमे भवति। अत्र कालिदासः प्रदर्शयति यत् सत्यं मिलनं सांसारिक-आडम्बरेषु न, अपितु तपसः शान्तेः च वातावरणे एव सम्भवम् अस्ति।

पुत्रः सर्वदमनः (भरतः) माध्यमरूपः भवति। शकुन्तलादुष्यन्तयोः मिलने सिहशावकैः क्रीडतः साहसिकस्य पुत्रस्य सर्वदमनस्य महती भूमिका भवति। बालकं प्रति दुष्यन्तस्य आकर्षणं तं शकुन्तलां प्रति नेति।उदात्ता क्षमा पुनर्मिलनं च: यदा दुष्यन्तशकुन्तलयाः चरणयोः पतित्वा स्वप्रमादस्य क्षमां याचते, तदा शकुन्तला कञ्चिदपि द्वेषं विना तं स्वीकुरुते। सा वदति यत् इदं सर्वं पूर्वजन्मकर्मणां भाग्यस्य वा क्रीडा आसीत्।

**ठ)मङ्गलमयाः कौटुम्बिक-उपदेशाः (पारिवारिकमूल्यानि)**

चतुर्थे अङ्के महर्षिः कण्वः शकुन्तलायै पतिगृहे कथं वर्तितव्यम् इति उपदिशति। एते उपदेशाः अद्यापि गृहस्थजीवनस्य आदर्शमूल्यानि सन्ति।

शुश्रूषस्व गुरून्: गुरूणां वृद्धानां च सेवां कुरु।प्रियसखीवृत्तिं सपत्नीजनेः सपत्नीषु (अन्यनारीषु) मित्रवत् व्यवहारं कुरु।विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः: पत्या तिरस्कृतापि कोपेन विपरीतं न आचर।

भविष्यसि गृहिणीपदेः अनेन प्रकारेण एव नारी गृहे आदरं प्राप्नोति।तदित्थम् कविः वर्णयति-

**शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने**
**भर्त्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः।**
**भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी**
**यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः॥**[6]

**ड) अतिथि-सत्कारम् -**

आश्रम-संस्कृतौ 'अतिथिः देवो भव' इत्यस्य मूल्यम् अत्यन्तम् महत्त्वपूर्णं दर्शितम्। तथापि दुर्वासा-ऋषेः अनादरः (अज्ञानेन) शापस्य कारणं भवति, यः इमं सन्देशं ददाति यद् अस्माभिः स्वकर्तव्यानाम् अतिथीनां च प्रति सदैव सत्कृतेन भवितव्यम्।अतिथिसत्कारे अवहेलनाकारणादेव शकुन्तलायाः कृते महर्षिणा दुर्वाससा अभिशापः प्रदत्तः।तदित्थम् –

**विचिन्तयन्ती यमनन्यमानसा**
**तपोधनं वेत्सि न मामुपस्थितम् ।**
**स्मरिष्यति त्वां न स बोधितोऽपि सन्**
**कथां प्रमत्तः प्रथमं कृतामिव ॥**[7]

अयम् श्लोकः महाकविना कालिदासस्य 'अभिज्ञानशाकुन्तलम्' इति नाटके चतुर्थाङ्के प्रयुक्तः। शकुन्तला दुष्यन्तस्य ध्याने मग्ना अस्ति। तस्मिन् एव समये क्रोधी ऋषिः दुर्वासा तत्र आगच्छति, किन्तु शकुन्तला तस्य आगमनं न जानाति। क्रुद्धः सन् ऋषिः शापं ददाति— यं विचिन्त्य त्वं माम् उपेक्षितवती, प्रमत्त इव सः अपि त्वां विस्मरिष्यतीत्यर्थः।

**निष्कर्षः -**

संक्षेपेण वक्तुं शक्यते यत् अभिज्ञानशाकुन्तलं मानवीयभावनानां, करुणायाः, प्रेमणः, विरहस्य च एक सजीवं चित्रणमस्ति। कालिदासस्य एषा संवेदनशीलता एव अस्मिन् नाटके सार्वभौमिकतां सर्वकालिकतां च आनयति।

**उपसंहारः -**

'अभिज्ञानशाकुन्तलम्' साहित्यदृष्ट्या अनुपमा कलाकृतिः अस्ति। सूक्ष्मतया अध्ययनं कुर्वन् पाठकः अस्मिन् काव्ये मानवीयभावानां दिव्यतायां रूपान्तरणं पश्यति। पितृस्नेहः, प्रेम, विरहः, करुणा, प्रकृतिसौन्दर्यम्, विवेकः, संयमः, त्यागः तथा आध्यात्मिकचेतना— एते सर्वे भावाः नाटकस्य प्रमुखं सौन्दर्यं निर्मान्ति। कालिदासस्य उद्देश्यं मानवीयचेतनां भौतिकजीवनात् आध्यात्मिकजीवनस्य दिशि प्रेरयितुम् अस्ति। प्रेम्णः पूर्णता केवलं आसक्तौ न, अपि तु सत्यस्य, त्यागस्य, कर्तव्यस्य, आत्मबोधस्य च समन्वये वर्तते। एष एव 'अभिज्ञानशाकुन्तलम्' इत्यस्य मानवीयसंवेदनायाः मूलसन्देशः।

**सन्दर्भग्रन्थसूची –**

**क)अभिज्ञानशाकुन्तलम्** – मूलग्रन्थरचयिता – महाकविः कालिदासः,संपादनम्-डॉ.श्री कृष्णमणि त्रिपाठी,चौखम्वा सुरभारती प्रकाशनम्,वाराणसी,2014

**ख)अभिज्ञानशाकुन्तलम्–** मूलग्रन्थरचयिता – महाकविः कालिदासः,संपादनम्-डॉ कपिलदेव द्विवेदी,भारतीय पुस्तक प्रकाशनम् ,2021

**पदान्तसूची -**

[1] अभि.शा.-1/17

[2] अभि.शा.-1/20

[3] अभि.शा.-3/17

[4] अभि.शा.-4/6

[5] अभि.शा.-4/12

[6] अभि.शा.-4/18

[7] अभि.शा.-4/1